# Shri Jyeshthamba Ashtakam

## શ્રીજ્યેષ્ઠામ્બાષ્ટકમ્

## Document Information

```
Text title : Shri Jyeshthamba Ashtakam
File name : jyeShThAmbAShTakam.itx
Category : devii, aShTaka, otherforms, devI
Location : doc_devii
Proofread by : Vani V.
Latest update : July 22, 2023
Send corrections to : sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 23, 2023

*sanskritdocuments.org*

# શ્રીજ્યેષ્ઠામ્બાષ્ટકમ્

જ્યેષ્ઠામ્બ તે ચરણકઞ્જયુગસ્ય સેવાં
    ત્યક્ત્વાશયા જગતિ સન્તિ વરાન્યદેવ્યઃ ।
ઇત્યાશ્રયેન સતતં પરિસેવિતાસ્તાઃ
    પ્રાપ્તો મયાત્ર નહિ કાણવરાટ કોઽપિ ॥ ૧॥

જ્યેષ્ઠામ્બ સેવનમિદં પરદેવતાનાં
    અજ્ઞાનમેવ મમ સમ્પ્રતિ વેદ્મિ તત્ત્વમ્ ।
અજ્ઞાનતઃ કરગતં મણિમપ્યુપેક્ષ
    કાચે મણિ ભ્રમયુતસ્ય ગતિર્મમાસીત્ ॥ ૨॥

જ્યેષ્ઠામ્બ તે ભુવિજના સતતં દરિદ્રા
    દેવીતિ નાં કથયન્તિ ન તે યથાર્થમ્ ।
જાનન્તિ કેવલધનેષણ તત્પરાસ્તે
    દારિદ્ર્યમેવ કિલ બ્રહ્મવિચારદક્ષમ્ ॥ ૩॥

જ્યેષ્ઠામ્બ તે કરુણયા મમ કલ્પિતં ત
    દારિદ્ર્યમેવ ભુવિ ભોગપરમ્પરાસુ ।
સ્વર્ગાદિ ભોગબહુશેઽપિ વિરાગબુદ્ધિ-
    મુત્પાદ્ય મેઽદદ દલં સુખમદ્વિતીયમ્ ॥ ૪॥

જ્યેષ્ઠામ્બ યુષ્મદનુજા શપથં ત્વયા શ્રીઃ
    કૃત્વા દરિદ્રમધુના ધનિકં કરોમિ ।
ઇત્યાગ્રહાત્વયમલં વિનિયુજ્યશક્તિં
    વ્યર્થાગ્રહા સપદિ સા શરણં ગતા ત્વામ્ ॥ ૫॥

જ્યેષ્ઠામ્બ તે શૃતિ સમિરિતમિત્યલક્ષ્મિ-
    ર્મામાસ્તિ લોકવિદિતં ખલુ ગૂઢતત્ત્વમ્ ।
અધ્યક્ષર ત્યજ મહેશ્વરવિષ્ણુરૂપં
    બ્રહ્મપ્રભોધકમકારમનુત્તરં ચ ॥ ૬॥

જ્યેષ્ઠામ્બ સર્વવિદિતા કિલ વિષ્ણુપત્ની
 લક્ષ્મી રતિ ત્વદનુજેતિ ન તેઽપિ લક્ષ્મા ।
ભેદોઽસ્તિ કિઞ્ચિદપિ નેત્રનિમીલનાત્તે
 ઉન્મીલનાચ્ચ ભુવિ નામ તથા દ્વિભાસીત્ ॥ ૭॥

જ્યેષ્ઠામ્બ તેઽક્ષિ યુગલં યદિ મીલિતં સ્વા
 ત્વાં તે તદા બુધજનાઃ કથયન્ત્યલક્ષ્મીમ્ ।
ઉન્મીલિતં યદિ તદા પ્રવદન્તિ લક્ષ્મી-
 મેકૈવ મૂર્તિરભવદ્વિવિદં તુ નામમ્ ॥ ૮॥

જ્યેષ્ઠામ્બાષ્ટકમષ્ટકષ્ટહરણં યો વા પઠેનિશ્ચયા
અષ્ટૈશ્વર્યમુપેત્ય સમ્પ્રતિ વિનષ્ટાન્યોન્ય ભેદભ્રમઃ
 કિં ચાદ્વૈતવિમર્શસર્વસમતાયુક્તો વિશુદ્ધાશયઃ ।
બ્રહ્માત્મૈકમપિ પ્રયાગિ સહસા જ્યેષ્ઠામ્બિકાનુગ્રહાત્
શ્રીમત્સર સુખાનન્દનાથસ્ય ચરણાર્થિના
 શ્રીયાનન્દેન કથિતં જ્યેષ્ઠામ્બાયાઃ પરાષ્ટકમ્ ॥ ૯॥

ઇતિ જ્યેષ્ઠામ્બાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by Vani V.

*Shri Jyeshthamba Ashtakam*

pdf was typeset on July 23, 2023

Please send corrections to *sanskrit@cheerful.com*